00154954

NOT TO BE ISSUED
OUT OF THE LIBRARY.

Sk.
891·21
Jay/Git
154954

THE
ASIATIC SOCIETY OF BOMBAY
TOWN HALL, BOMBAY-1.

Digitized with financial assistance from the
Mr. Sangi
on 12 April, 2019

॥ श्रीः ॥

इदं

जयदेवपंडितकविकृतं गीतगोविन्दंकाव्यम्.

इदंपुस्तकं

ज्ञानसागरमुद्रणालयाधिपतिना,

पंडित शिवलालात्मज श्रीधरेण

मुंबय्यां स्वीये मुद्रणालये मुद्रापितम् ।

शकाब्दाः १८१३ सन १८९१.

ASIATIC SOCIETY OF BOMBAY
Presented by:-
Shri. J. S. Deshpande.
Date 21.4.71

00154954

गा-गो-पोत्र

॥ श्रीः ॥

॥ गीतगोविन्दंकाव्यम् ॥

॥ प्रथमःसर्गः ॥

॥ श्लोकः ॥ ॥ मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ॥ इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ॥ १ ॥ वाग्देवताचरितचित्रितचित्तसद्मा पद्मावतीचरणचारणचक्रवर्ती ॥ श्रीवासुदेवरतिकेलिकथासमेतमेतंकरोति जयदेवकविः प्रबन्धम् ॥ २ ॥ यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम् ॥ मधुरकोमलकान्तपदावलिं शृणु तदा जयदेवसरस्वतीम् ॥ ३ ॥ वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां जानीते

जयदेव एव शरणः श्लाघ्यो दुरूहद्रुतेः ॥ शृङ्गारोत्तरसत्प्रमेयवचनैराचार्यगोवर्द्धनस्पर्द्धी कोपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः ॥ ४ ॥

मालवरागेरूपकताले अष्टपदी १.

प्रलयपयोधिजले धृतवानसि वेदं ॥ विहितवहित्रचरित्रमखेदम् ॥ केशव धृतमीनशरीर जय जगदीश हरे ॥ ध्रुव० ॥ १ ॥ क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ॥ धरणीधरणकिणचक्रगरिष्ठे ॥ केशवधृतकच्छपरूप जय जगदीश हरे ॥ २ ॥ वसतिदशनशिखरे धरणी तव लग्ना ॥ शशिनि कलंक कलेव निमग्ना ॥ केशव धृतसूकररूप जय जगदीश हरे ॥ ३ ॥ तव करकमलवरे नखमद्भुतशृंगं ॥ दलितहिरण्यकशिपुतनुभृंगं ॥ केशव धृतनरहरिरूप जय जगदीश हरे ॥ ४ ॥ छलयसि विक्रमणे बलिमद्भुतवामन ॥ पदनखनीरजानितजनपावन ॥ केशव धृतवामनरूप जय

जगदीश हरे ॥ ५ ॥ क्षत्रियरुधिरमये जगदपगतपापं ॥ स्नपयसि पयसि शमितभवतापम् ॥ केशव धृतभृगुपतिरूप जय जगदीश हरे ॥ ६ ॥ वितरसि दिक्षु रणे दिक्पतिकमनीयं ॥ दशमुखमौलिबलिं रमणीयम् ॥ केशव धृतरामशरीर जय जगदीश हरे ॥ ७ ॥ वहसि वपुषि विशदे वसनं जलदाभं ॥ हलहतिभीतिमिलितयमुनाभम् ॥ केशव धृतहलधररूप जय जगदीश हरे ॥ ८ ॥ निन्दसि यज्ञविधेरहह श्रुतिजातं ॥ सदयहृदयदर्शितपशुघातम् ॥ केशव धृतबुद्धशरीर जय जगदीश हरे ॥ ९ ॥ म्लेच्छनिवहनिधने कलयसि करवालं ॥ धूमकेतुमिव किमपि करालम् ॥ केशव धृतकल्किशरीर जय जगदीश हरे ॥ १० ॥ श्रीजयदेवकवेरिदमुदितमुदारं ॥ शृणु शुभदं सुखदं भवसारम् ॥ केशव धृत दशविधरूप जय जगदीश हरे ॥ ११ ॥

॥ श्लोकः ॥ ॥ वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते दैत्यान् दारयते बलिं छलयते क्षत्रक्षयं कुर्वते ॥ पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते म्लेच्छान् मूर्च्छयते दशाकृतिधृते कृष्णाय तुभ्यं नमः ॥ ५ ॥

गुर्जररागेप्रतिमंठताले अष्टपदी २.

श्रितकमलाकुचमण्डल धृतकुण्डलए ॥ कलितललितवनमाल जय जयदेव हरे ॥ ध्रु० ॥ १ ॥ दिनमणिमण्डलमण्डन भवखण्डनए ॥ मुनिजनमानसहंस जय जय देव हरे ॥ २ ॥ कालियविषधरगंजन जनरंजनए ॥ यदुकुलनलिनदिनेश जय जयदेव हरे ॥ ३ ॥ मधुमुरनरकविनाशन गरुडासनए ॥ सुरकुलकेलिनिदान जय जय देव हरे ॥ ४ ॥ अमलकमलदललोचन भवमोचनए ॥ त्रिभुवनभवननिधान जय जयदेव हरे ॥ ५ ॥ जनकसुताकृतभूषण जितदूषणए ॥ समरशमित-

दशकंठ जय जयदेव हरे ॥ ६ ॥ अभिनवजल-
धरसुन्दर धृतमंदरए ॥ श्रीमुखचंद्रचकोर जय
जयदेव हरे ॥ ७ ॥ तवचरणे प्रणतावयमिति
भावयए ॥ कुरु कुशलं प्रणतेषु जय जयदेव हरे
॥ ८ ॥ श्रीजयदेवकवेरिदं कुरुते मुदम् ॥ मंगलमु
ज्ज्वलगीतं जय जय देव हरे ॥ ९ ॥

॥ श्लोकः ॥ ॥ पद्मापयोधरतटीपरिरम्भलग्न-
काश्मीरमुद्रितमुरोमधुसूदनस्य ॥ व्यक्तानुरागमिव
खेलदनंगखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं वः ॥ ६ ॥
वसंते वासन्तीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे
बहुविहितकृष्णानुसरणाम् ॥ अमन्दं कन्दर्पज्वर-
जनितचिंताकुलतया चलद्बाधां राधां सरसमिदमूचे
सहचरी ॥ ७ ॥

वसंतरागेरूपकताले अष्टपदी ३.

ललितलवंगलतापरिशीलनकोमलमलयसमीरे॥

मधुकरनिकरकरम्बितकोकिलकूजितकुंजकुटीरे ॥
॥ १ ॥ विहरति हरिरिह सरसवसंते ॥ नृत्यतियु-
वतिजनेन समं सखि विरहिजनस्य दुरंते ॥ ध्रु० ॥
उन्मदमदनमनोरथपथिकवधूजनजनितविलापे ॥
अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे ॥
॥ २ ॥ मृगमदसौरभरभसवशंवदनवदलमालतमा-
ले ॥ युवजनहृदयविदारणमनसिजनखरुचिकिंशु-
कजाले ॥ ३ ॥ मदनमहीपतिकनकदंडरुचिकेश-
रकुसुमविकासे ॥ मिलितशिलीमुखपाटलिपटलकृ-
तस्मरतूणविलासे ॥ ४ ॥ विगलितलज्जितजगदव-
लोकनतरुणकरुणकृतहासे ॥ विरहिनिकृन्तनकुन्त-
मुखाकृतिकेतकिदन्तुरिताशे ॥ ५ ॥ माधविकापरि-
मलललिते नवमालतिजातिसुगन्धौ ॥ मुनिमन-
सामपिमोहनकारिणितरुणाकारणबन्धौ ॥ ६ ॥ स्फुर-
दतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते ॥ बृ-
न्दावनविपिने परिसरपरिगतयमुनाजलपूते ॥ ७ ॥

श्रीजयदेवभणितमिदमुदयतु हरिचरणस्मृतिसारम् ॥ सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम् ॥ ८ ॥

॥ श्लोकः ॥ दरविदलितमल्लीवल्लिचञ्चत्परागप्रकटितपटवासैर्वासयन् काननानि ॥ इह हि दहति चेतःकेतकीगन्धबन्धुःप्रसरदसमबाणप्राणवद्गन्धवाहः ॥ ८ ॥ उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुरक्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः ॥ नीयन्ते पथिकैःकथं कथमपि ध्यानावधानक्षणप्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः ॥ ९ ॥ अनेकनारीपरिरम्भसंभ्रमस्फुरन्मनोहारिविलासलालसम् ॥ मुरारिमाराडुपदर्शयन्त्यसौ सखीसमक्षं पुनराह राधिकां ॥ १० ॥

रामकरिरागेरूपकताले अष्टपदी ४.

चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली ॥

केलिचलन्मणिकुण्डलमण्डितगण्डयुगस्मितशाली॥ हरिरिह मुग्धवधूनिकरे ॥ विलासिनि विलसति- केलिपरे ॥ १ ॥ ध्रुव० ॥ पीनपयोधरभारभरेण हरिं परिरम्य सरागम् ॥ गोपवधूरनुगायति काचि- दुदंचितपंचमरागं ॥ हरिरिहमु० ॥ २ ॥ कापि विलासविलोलविलोचनखेलनजनितमनोजं ॥ ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम् ॥ हरिरि० ॥ ३ ॥ कापि कपोलतले मिलितालपितुं किमपि श्रुतिमूले ॥ चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले ॥ हरिरिह० ॥ ४ ॥ केलि- कलाकुतुकेन च काचिदमुं यमुनाजलकूले ॥ मंजु- लवंजुलकुंजगतं विचकर्ष करेण दुकूले ॥ हरिरि० ॥ ५ ॥ करतलताततरलवलयावलिकलित कल- स्वनवंशे ॥ रासरसे सह नृत्यपरा हरिणा युवतिः प्रशशंसे ॥ हरिरि० ॥ ६ ॥ श्लिष्यति कामपि चुम्बति कामपि रमयति कामपि रामां ॥ पश्य-

तिसस्मितचारुपरामपरामनुगच्छतिवामां ॥ हरिरि० ॥ ७ ॥ श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् ॥ वृंदावनविपिने ललितं वितनोतु शुभानि यशस्यम् ॥ हरिरिह० ॥ ८ ॥

॥ श्लोकः ॥ विश्वेषामनुरंजनेन जनयन्नानन्दमिन्दीवरश्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनंगोत्सवम् ॥ स्वच्छन्दंव्रजसुन्दरीभिरभितःप्रत्यङ्गमालिङ्गितः शृंगारः सखिमूर्तिमानिवमधौ मुग्धोहरिःक्रीडति ॥ ११ ॥ अद्योत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलप्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः ॥ किंचित्स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदयादुन्मीलंतिकुहूः कुहूरिति कलोत्तालाः पिकानांगिरः ॥ १२ ॥ रासोल्लासभरेण विभ्रमभृतामाभीरवामभ्रुवामभ्यर्णं परिरभ्य निर्भरमुरः प्रेमाऽधया राधया ॥ साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुतिव्याजादुद्भटचुम्बितःस्मितमनोहारी हरिः

पातु वः ॥ १३ ॥ इतिश्रीकविराजजयदेवकृते गीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः ॥

॥ अथ द्वितीयः सर्गः ॥

॥श्लोकः॥ विहरति वने राधा साधारण प्रणये हरौ विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः ॥ क्वचिदपि लताकुंजे गुंजन्मधुव्रतमण्डली मुखरशिखरे लीना दीना प्युवाच रहःसखीम् ॥ १ ॥

गुर्जररागेरूपकतालेअष्टपदी १.

संचरदधरसुधामधुरध्वनिमुखरितमोहनवंशं ॥
चलितदृगंचलचंचलमौलिकपोलविलोलवतंसम् ॥
रासे हरिमिह विहितविलासं स्मरतिमनो मम कृतपरिहासम् ॥ ध्रु० ॥ १ ॥ चन्द्रकचारुमयूरशिखंडकमंडलवलयितकेशम् ॥ रासे० ॥ २ ॥ गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम् ॥ बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम् ॥ रास० ॥ ३ ॥

विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्रम्॥ करचरणोरसिमणिगणभूषणकिरणविभिन्नतमिस्रम्॥ रासे० ॥ ४ ॥ जलदपटलचलदिन्दुविनिन्दकचन्दनातिलकललाटम्॥ पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम् ॥ रासे० ॥ ५ ॥ मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम् ॥ पीतवसनमनुगतमुनिमनुजसुरासुर वरपरिवारम् ॥ रासे० ॥ ॥ ६ ॥ विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम्॥ रासे० ॥ ७ ॥ श्रीजयदेवभणितमति सुन्दरमोहनमधुरिपुरूपम् ॥ रासे० ॥ ८ ॥

॥ श्लोकः ॥ गणयति गुणग्रामं भ्रामं भ्रमादपि नेहते वहति च परीतोषं दोषं विमुंचति दूरतः॥ युवतिषु चलत्तृष्णे कृष्णे विहारिणिमांविनापुनरपि मनोवामं कामं करोति करोमिकिम् ॥ २ ॥

मालवरागेएकतालीताले अष्टपदी २.

निभृतनिकुंजगृहं गतया निशि रहसि निलीय

वसन्तम् ॥ चकितविलोकितसकलदिशारतिरभस
भरेण हसन्तम् ॥ सखिहे केशिमथनमुदारम् ॥
रमयमया सह मदनमनोरथभावितया सविकारम् ॥
॥ ध्रु० ॥ १ ॥ प्रथमसमागमलज्जितया पटुचाटुशतै
रनुकूलम् ॥ मृदुमधुरस्मितभाषितया शिथिलीकृत
जघनदुकूलम् ॥ सखिहे० ॥ २ ॥ किसलयशयन
निवेशितयाचिरमुरसि ममैव शयानम् ॥ कृतपरि
रम्भणचुम्बनया परिरभ्य कृताधरपानम् ॥ सखिहे०
॥ ३ ॥ अलसनिमीलितलोचनया पुलकावलिल
लितकपोलम् ॥ श्रमजलसिक्तकलेवरयावरमदनम
दादतिलोलम् ॥ सखिहे० ॥ ४ ॥ कोकिलकलरव
कूजितया जितमनसिजतंत्रविचारम् ॥ श्लथकुसु
माकुलकुन्तलया नखलिखितघनस्तनभारम् ॥
॥ सखिहे० ॥ ५ ॥ चरणरणितमणिनूपुरया परि
पूरितसुरतवितानम् ॥ मुखरविशृंखलमेखलया स-
कचग्रहचुम्बनदानम् ॥ सखिहे० ॥ ६ ॥ रतिसुख

समयरसालसया दरमुकुलितनयनसरोजम् ॥ निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम् ॥ सखिहे० ॥ ७ ॥ श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम् ॥ सुखमुत्कण्ठितराधिकया कथितंवितनोतुसलीलम् ॥ सखि० ॥

॥ श्लोक ॥ हस्तस्रस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवीवृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम् ॥ मामुद्वीक्ष्य विलज्जितास्मितसुधामुग्धाननं कानने गोविन्दं व्रजसुन्दरीगणवृतं पश्यामिहृष्यामिच ॥ ३ ॥ दुरालोकस्तोकस्तबकनवकाशोकलतिकाविकाशःकासारोपवनपवनोऽपिव्यथयति ॥ अपिभ्राम्यद्भृंगीरणितरमणीया न मुकुलप्रसूतिश्चूतानां सखि शिखरिणीयं सुखयति ॥ ४ ॥ साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासितभ्रूवल्लीकमलीकदर्शितभुजाबालार्द्धहस्तस्तनम् ॥ गोपीनां निभृतं निरीक्ष्य ललितांकांचिच्चिरंचिन्तयन्नन्तर्मु-

ग्धमनोहरो हरतु वः क्लेशं नवःकेशवः ॥ ५ ॥ इति श्रीगीतगोविन्दे अक्लेशकेशवोनाम द्वितीयःसर्गः २

॥ अथ तृतीयसर्गः प्रारंभः ॥

॥ श्लोकः ॥ कंसारिरपि संसारवासनाबंधशृंखलाम् ॥ राधामाधाय हृदये तत्याजव्रजसुन्दरीः ॥ १ ॥ इतस्ततस्तामनुसृत्य राधिकामनंगबाणव्रणखिन्नमानसः ॥ कृतानुतापःसकलिन्दनन्दिनीतटान्तकुंजे निषसाद माधवः ॥ २ ॥

गुर्जरीरागे प्रतिमंठताले अष्टप० १

मामियं चलिता विलोक्य वृतं वधूनिचयेन ॥ सापराधतया मयापि न वारितातिभयेन ॥ हरि हरि हतादरतया सागता कुपितेव ॥ ध्रु० ॥ १ ॥ किं करिष्यति किं वदिष्यति सा चिरंविरहेण ॥ किं धनेन जनेन किं मम जीवितेन गृहेण ॥ हरि० ॥ २ ॥ चिंतयामि तदाननं कुटिल भ्रुरोष भरेण ॥

शोणपद्ममिवोपरिभ्रमताकुलं भ्रमरेण ॥ हरिहरिह०
॥ ३ ॥ तामहं हृदिसंगतामनिशं भृशंरमयामि ॥
किं वनेनुसरामि तामिह किं वृथा विलपामि ॥
हरि० ॥ ४ ॥ तन्विखिन्नमसूयया हृदयं तवाकल-
यामि ॥ तन्न वेद्मि कुतो गतासिन तेन तेनुनयामि
॥ हरि० ॥ ५ ॥ पश्य मे पुरतो गता गतमेव मे
विदधासि ॥ किं पुरेव स संभ्रमं परिरंभणं न द-
दासि ॥ हरि० ॥ ६ ॥ क्षम्यतामपरं कदापि तवे-
दृशं न करोमि ॥ देहि सुंदरि दर्शनं मम मन्मथेन
दुनोमि हरि० ॥ ७ ॥ वर्णितं जयदेवकेन हरेरिदंप्र-
णतेन ॥ किंदुबिल्वसमुद्रसंभवरोहिणीरमणेन ॥
हरिहरिहता० ॥ ८ ॥

॥ श्लोकः ॥ भ्रूपल्लवो धनुरपांगतरंगितानि
बाणागुणः श्रवणपालिरितिस्मरेण ॥ तस्यामनंग-
जयजंगमदेवतायामस्त्राणि निर्जितजगंति किम-
र्पितानि ॥ ३ ॥ हृदि विसलताहारो नायं भुजं-

गमनायकः कुवलयदलश्रेणीकंठे न सा न सा गरलद्युतिः ॥ मलयजरजो नेदंभस्म प्रियारहिते मयि प्रहर न हरभ्रांत्यानंग क्रुधा किमुधावसि ॥ ॥ ४ ॥ पाणौ मा कुरुचूतसायकममुं मा चापमारोपय क्रीडानिर्जितविश्वमूर्छितजनावातेन किं पौरुषम् ॥ तस्याएवमृगीदृशो मनसिजप्रेंखत्कटाक्षानलः ज्वालाजर्जरितं मनागपि मनो नाद्यापि संधुक्षते ॥ ५ ॥ भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां शामात्मा कुटिलः करोतु कबरी भारापि मारोद्यमं ॥ मोहं तावदयं च तन्वि तनुतां विंबाधरो रागवान् सद्वृत्तस्तनमंडलस्तव कथं प्राणैर्मम क्रीडति ॥ ६ ॥ तानिस्पर्शसुखानि ते च तरलास्निग्धादृशोविभ्रमास्तद्वक्त्रांबुजसौरभं स च सुधास्यंदीगिरां वक्रिमा सा बिंबाधरसुग्धरीति विषयासंगेपि मन्मानसं तस्यांलग्नसमाधि हंत विरहव्याधिः कथं वर्ततें ॥ ७ ॥ तिर्यक्कंठविलोलमौ-

लितरलोत्तंसस्य वंशोच्चरद्गीतस्थानकृतावधानलल-
नालक्षैर्न संलक्षिताः ॥ संमुग्धं मधुसूदनस्य
मधुरे राधामुखेंदौमृदुस्पंदंपल्लविताश्चिरं ददतु
वःक्षेमं कटाक्षोर्मयः ॥ ८ ॥

इति गीतगोविंदे मुग्ध मधुसूदनोनाम
तृतीयः सर्गः ॥ ३ ॥

॥ अथ चतुर्थसर्गप्रारंभः ॥

॥ श्लोकः ॥ यमुनातीरवानीर निकुंजे मंदमा-
स्थितम् ॥ प्राह प्रेमभरोद्भ्रांतं माधवं राधिकासखी
॥ १ ॥ कर्नाटकरागे एकतालीताले अष्टपदी ॥
॥ १ ॥ निंदति चंदनमिंदुकिरणमनुविंदति खेदमधी-
रम् ॥ व्यालनिलयमिलनेन गरलमिव कलयतिमल-
यसमीरम् ॥ सा विरहे तव दीनामाधव मनसिज
विशिखभयादिवभावनयात्वयि लीना ॥ ध्रु० ॥
॥ १ ॥ अविरल निपतितमदनशरादिव भवदव ना-
यविशालम् ॥ स्वहृदय मर्मणि वर्म करोति सजल

नलिनीदलजालम् ॥ सा विर० ॥ २ ॥ कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम् ॥ व्रतमिव तव परिरंभसुखायकरोति कुसुमशयनीयं॥ सा विर० ॥ ३ ॥ वहतिच चलितविलोचनजलधरमाननकमलमुदारम् ॥ विधुमिव विकटविधुंतुद दंतदलनगलितामृतधारम् ॥ सा विर० ॥ ४ ॥ विलिखति रहसि कुरंगमदेन भवंतमसमशरभूतम् ॥ प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम् ॥ सा विर० ॥ ५ ॥ प्रतिपदमिदमपिनिगदति माधव तव चरणे पतिताहम् ॥ त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम् ॥ सा विर० ॥ ६ ॥ ध्यानलयेन पुरःपरिकल्प्य भवंतमतीवदुरापम् ॥ विलपति हसति विषीदति रोदिति चंचति मुंचति तापम् ॥ सा विर० ॥ ७ ॥ श्रीजयदेवभणितमिदमधिकं यदिमनसानटनीयम् ॥ हरिविरहाकुलबल्लवयुवतिसखीवचनं पठनीयम् ॥ सा वि० ॥ ८ ॥

॥ श्लोकः ॥ आवासो विपिनायते प्रियसखी मालापि जालायते तापोपि श्वसितेन दावदहन-ज्वालाकलापायते ॥ सापि त्वद्विरहेण हंत हरिणीरूपायते हा कथं कंदर्पोपि यमायते विरचयन् शार्दूलविक्रीडितम् ॥ २ ॥

देशांकरागे एकतालीताले अष्टपदी २.

स्तनविनिहितमपि हारमुदारम् ॥ सा मनुते कृशतनुरतिभारम् ॥ राधिका विरहे तव केशव ॥ ध्रु० ॥ १ ॥ सरसमसृणमपि मलयजपंकम् ॥ पश्यति विषमिव वपुषि सशंकम् ॥ राधिका० ॥ २ ॥ श्वसितपवनमनुपमपरिणाहम् ॥ मदनदहनमिव वहतिसदाहम् ॥ राधिका० ॥ ३ ॥ दिशि दिशि किरति सजलकणजालम् ॥ नयननलिनमिव विगलितनालम् ॥ राधिका० ॥ ४ ॥ नयनविषयमपिकिसलयतल्पम् ॥ गणयति विहितहुताशविकल्पम् ॥ राधिका० ॥ ५ ॥ त्यजति न पाणितलेन

कपोलम् ॥ बालशशिनमिव सायमलोलम् ॥ राधिका० ॥ ६ ॥ हरिरिरिति हरिरिति जपति सकामम् ॥ विरह विहित मरणेवनिकामम् ॥ राधिका० ॥ ७ ॥ श्रीजयदेवभणितमिति गीतम् ॥ सुखयतु केशवपदमुपनीतम् ॥ राधिका ॥ ८ ॥

॥ श्लोकाः ॥ सा रोमांचति सीत्करोति विलपत्युत्कंपते ताम्यति ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्छत्यपि ॥ एतावत्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसात्स्वर्वैद्यप्रतिमप्रसीदसि यदि त्यक्तोन्यथा हस्तकः ॥ ३ ॥ स्मरातुरां दैवतवैद्यहृद्यत्वदंगसंगामृतमात्रसाध्या ॥ विमुक्तबाधां कुरुषे न राधामुपेंद्रवज्रादपि दारुणोसि ॥ ४ ॥ कंदर्प ज्वरसंज्वराकुलतनोराश्चर्यमस्याश्चिरं चेतश्चंदनचंद्रमःकमलिनी॥चिंतासु ताम्यत्यपि ॥ किंतु क्षांतिवशेनशीतलतनुं त्वामेकमेव प्रियं ध्यायंती रहसि स्थिता कथमपि क्षीणाक्षणं प्राणिति ॥ ५ ॥ क्षणमपिविर-

हः पुरा न सेहे नयननिमीलनखिन्नया यया ते ॥ श्वसिति कथमसौ रसालशाखां चिरविरहेण विलोक्य पुष्पिताग्राम् ॥ ६ ॥ वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्धनं बिभ्रद्बल्लवसुंदरीभिरधिकानंदाच्चिरं चुंबितः ॥ कंदर्पेणतदर्पिताधरतटीसिंदूरमुद्रांकितोबाहुर्गोपतनोस्तनोतुभवतां श्रेयांसि कंसद्विषः ॥ ७ ॥ इति श्रीगीतगोविंदे स्निग्धमाधवो-नाम चतुर्थः सर्गः ॥ ४ ॥

॥ अथ पंचमः सर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ अहमिह निवसामि याहि राधामनुनयमद्वचनेन चानयेथाः ॥ इतिमधुरिपुणासखीनियुक्ता स्वयमिदमेत्य पुनर्जगाद राधाम् ॥ १ ॥

देशवराडिरागे रूपकताले अष्टपदी १.

वहति मलयसमीर मदनमुपनिधाय ॥ स्फुटति कुसुमनिकरे विरहिहृदयदलनाय ॥ तवविरहे वनमाली सखि सीदति ॥ ध्रु० ॥ १ ॥ दहति

शिशिरमयूखे मरणमनुकरोति ॥ पतति मदनविशिखेविलपति विकलतरोति ॥ तव विर० ॥ २ ॥ ध्वनति मधुपसमूहे श्रवणमपिदधाति ॥ मनसि वलितविरहे निशि निशि रुजमुपयाति ॥ तव वि० ॥ ३ ॥ वसति विपिनविताने त्यजति ललितमपिधाम ॥ लुठति धरणिशयने बहु विलपति तव नाम ॥ तव वि० ॥ ४ ॥ भणति कवि जयदेव इति विरहिविलसितेन ॥ मनसि रभसविभवे हरि रुदयतुसुकृतेन ॥ तव वि० ॥ ५ ॥

॥ श्लोकः ॥ पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धयस्तस्मिन्नेव निकुंजमन्मथमहातीर्थे पुनर्माधवः ॥ ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमंत्रावलिं भूयस्त्वत्कुचकुंभनिर्भरपरीरंभामृतंवांछति ॥ २ ॥

गुर्जररागे एकतालीताले अष्टपदी २.

रतिमुखसारे गतमभिसारे मदनमनोहरवेषं ॥

नकुरुनितंबिनिगमनविलंबनमनुसरतंहृदयेशं ॥
धीरसमीरे यमुनातीरे वसति वने वनमाली ॥
गोपीपीनपयोधरमर्दनचंचलकरयुगशाली ॥ ध्रु०
॥ १ ॥ नामसमेतं कृतसंकेतंवादयते मृदुवेणुम् ॥
बहु मनुते तनुते तनुसंगतपवनचलितमपिरेणुम् ॥
॥ धीरस० ॥ २ ॥ पतति पतत्रे विचलति पत्रे
शंकितभवदुपयानम् ॥ रचयति शयनं सचकित
नयनं पश्यति तव पंथानम् ॥ धीरस० ॥ ३ ॥
मुखरमधीरंत्यज मंजीरं रिपुमिव केलिसुलोलम् ॥
चल सखि कुंजं सतिमिरपुंजं शीलय नीलनिचोलम्
॥ धीरस० ॥ ४ ॥ उरसिमुरारेरुपहितहारे घनइव
तरलबलाके ॥ तडिदिवपीते रतिविपरीते राजसि
सुकृतविपाके ॥ धीरस० ॥ ५ ॥ विगलितवसनं
परिहृतरशनं घटयजघनमपिधानम् ॥ किसलयश-
यने पंकजनयने निधिमिव हर्षनिधानम् ॥ धीर
स० ॥ ६ ॥ हरिरभिमानी रजनिरिदानीमियमपि

याति विरामम् ॥ कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम् ॥ धीरस० ॥ ७ ॥ श्रीजयदेवे कृत हरिसेवे भणति परमरमणीयम् ॥ प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ॥ धीरसमीरे यमुनातीरे वसति वने वन० ॥ ८ ॥

॥ श्लोकाः ॥ विकिरति मुहुः श्वासानाशाःपुरो मुहुरीक्षते प्रविशति मुहुःकुंजं गुंजन् मुहुर्बहुताम्यति ॥ रचयति मुहुःशय्यां पर्याकुलं मुहुरीक्षते मदनकदनक्लांतः कांते प्रियस्तव वर्तते ॥ ३ ॥ त्वद्वाक्येन समं समग्रमधुना तिग्मांशुरस्तं गतो गोविंदस्य मनोरथेनच समं प्राप्तं तमः सांद्रताम् ॥ कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना तन्मुग्धे विफलं विलंबनमसौ रम्योभिसारक्षणः ॥ ॥ ४ ॥ आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वांतजातप्रोद्बोधादनु संभ्रमादनु रतारंभादनुप्रीतयोः ॥ अन्यार्थं गतयोर्भ्रमान्मिलितयोःसंभाषणे

जानतोर्दंपत्योर्निशि कोन कोन तमसिव्रीडावि-
मिश्रो रसः ॥ ५ ॥ सभयचकितं विन्यस्यंतीं दृशं तिमिरे पथि प्रतितरु मुहुः स्थित्वा मंदंपदानि वितन्वतीम् ॥ कथमपि रहःप्राप्तामंगैरनंगतरंगिभिः सुमुखि सुभगः पश्यन् स त्वामुपैतु कृतार्थताम् ॥६॥ राधामुग्धमुखारविंदमधुपस्त्रैलोक्यमौलिस्थलीनेपथ्योचितनीलरत्नमवनीभारावतारक्षमः ॥ स्वच्छंदं व्रजसुंदरीजनमनस्तोषप्रदोषश्चिरं कंसध्वंसनधूमकेतुरवतु त्वां देवकीनंदनः ॥ ७ ॥

इति श्रीगीतगोविंदे अभिसारिकासाकांक्षपुंडरीकाक्षोनाम पंचमः सर्गः समाप्तः ॥ ५ ॥

॥ अथ षष्ठः सर्गः ॥

॥ आर्या ॥ अथ तां गंतुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा ॥ तच्चरितं गोविंदे मनसिजमंदे सखी प्राह ॥ १ ॥

॥ गुणकरिरागे रूपकताले अष्टपदी ॥

पश्यति दिशिदिशि रहसि भवंतम् ॥ त्वदधर मधुरमधूनि पिबंतम् ॥ नाथ हरे जय नाथ हरे सीदति राधा वासगृहे ॥ ध्रु० ॥ १ ॥ त्वदभिसरणरभसेन वलंती ॥ पतति पदानि कियंति चलंती ॥ नाथ ह० ॥ २ ॥ विहितविशदबिसकिसलयवलया ॥ जीवति परमिह तवरतिकलया ॥ नाथ ह० ॥ ३ ॥ मुहुरवलोकितमंडनलीला ॥ मधुरिपुरहमिति भावनशीला ॥ नाथ हरे० ॥ ४ ॥ त्वरितमुपैति न कथमभिसारम् ॥ हरिरिति वदति सखीमनुवारम् ॥ नाथ हरे० ॥ ५ ॥ श्लिष्यति चुंबति जलधरकल्पं ॥ हरिरुपगतइति तिमिरमनल्पम् ॥ नाथ हरे० ॥ ६ ॥ भवति विलंबिनि विगलित लज्जा विलपति रोदिति वासकसज्जा ॥ नाथ हरे० ॥ ७ ॥ श्रीजयदेवकवेरिदमुदितम् ॥ रसिकजनं तनुतामतिमुदितम् ॥ नाथ ह० ॥ ८ ॥

॥ श्लोकाः ॥ विपुलपुलकपालिः स्फीतसीत्कारमंत-
र्जनितजडिमकाकुव्याकुलं व्याहरंती ॥ तव कितव
विधायामंदकंदर्पचिंतां रसजलधि निमग्नाध्यान-
लग्ना मृगाक्षी ॥ २ ॥ अंगेष्वाभरणंकरोति बहुशः
पत्रेपि संचारिणि प्राप्तं त्वां परिशंकते वितनुते शय्यां
चिरंध्यायति ॥ इत्याकल्पविकल्पतल्परचनासंकल्प
लीलाशतव्यासक्तापिविना त्वया वरतनुर्नैषा निशां
नेष्यति ॥ ३ ॥ किं विश्राम्यसि कृष्ण भोगिभवने
भांडीरभूमीरुहि भ्रातर्यासि न दृष्टिगोचरमितः
सानंदनंदास्पदम् ॥ राधाया वचनं तदध्वगमुखा-
न्नंदांतिके गोपतो गोविंदस्य जयंति सायमति-
थिप्राशस्त्यगर्भागिरः ॥ ४ ॥ इति श्रीगीतगोविंदे
वासकसज्जावर्णने सोत्कंठवैकुंठोनाम षष्ठःसर्गः ॥६॥

॥ अथ सप्तमः सर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ अत्रांतरे च कुलटाकुलवर्त्मपातसं-
जातपातकइव स्फुटलांछनश्रीः ॥ वृंदावनांतरमदी

पयदंशुजालैर्दिक्सुंदरीवदनचंदनबिंदुरिंदुः ॥ १ ॥

॥ आर्या ॥ प्रसरति शशधरबिंबे विहितविलंबे च माधवेविधुरा ॥ विरचितविविधविलापं सा परितापं चकारोच्चैः ॥ २ ॥

गौडमालवरागे प्रतिमंठताले अष्टपदी १.

कथितसमयेपि हरिरहह न ययौ वनम् ॥ मम विफलमेतदनुरूपमपि यौवनम् ॥ यामि हे कमिह शरणं सखीजनवचनवंचिता ॥ ध्रु० ॥ १ ॥ यदनुगमनाय निशि गहनमपि शीलितम् ॥ तेन मम हृदयमिदमसमशरकीलितम् ॥ यामि० ॥ २ ॥ मम मरणमेव वरमतिवितथकेतना ॥ किमितिविषहामि विरहानलमचेतना ॥ यामि० ॥ ३ ॥ मामहह विधुरयति मधुरमधुयामिनी ॥ कापि हरिमनुभवति कृतसुकृतकामिनी ॥ यामि० ॥ ४ ॥ अहह कलयामिवलयादिमणिभूषणम् ॥ हरिविरहदहनवहनेनबहुदूषणम् ॥ यामि० ॥ ५ ॥ कुसु

मसुकुमार तनुमतनुशरलीलया ॥ स्रगपि हृदि हंति मामतिविषमशीलया ॥ यामि० ॥ ६ ॥ अहमिह निवसामि नगणितवनवेतसा ॥ स्मरतिमधुसूदनो मामपि न चेतसा ॥ यामि० ७ ॥ हरिचरणशरण जयदेवकविभारति ॥ वसतुहृदियुवतिरिव कोमल-कलावती ॥ यामि० ॥ ८ ॥

॥ श्लोकः ॥ ॥ तत्किं कामपि कामिनीमभिसृतः किंवा कलाकेलिभिर्बद्धो बंधुभिरंधकारिणि वनोपांते किमु भ्राम्यति ॥ कांतःक्लांतमनामनागपि पथि प्रस्थातुमेवाक्षमः संकेतीकृतमंजुवंजुल लताकुंजेपियन्नागतः ॥ ३ ॥ अथागतांमाधवमंतरेण सखीमियं वीक्ष्य विषादमूकाम् ॥ विशंकमाना रमितं कयापि जनार्दनं दृष्टवदेतदाह ॥ ४ ॥

वसंतरागे एकतालीताले अष्टपदी २

स्मरसमरोचितविरचितवेषा ॥ गलितकुसुमदलवि

ल्लुलितकेशा ॥ कापि चपला मधुरिपुणा विलसति युवतिरधिकगुणा ॥ ध्रु० ॥ १ ॥ हरिपरिरंभणवलित-विकारा ॥ कुचकलशोपरि तरलितहारा ॥ कापिच० ॥ २ ॥ विचलदलकललिताननचंद्रा ॥ तदधर-पानरभसकृततंद्रा ॥ कापिच० ॥ ३ ॥ चंचलकुंडलदलितकपोला ॥ मुखरितरशन जघनगति-लोला ॥ कापिच० ॥ ४ ॥ दयितविलोकितल-ज्जितहसिता ॥ बहुविधकूजित रतिरसभरिता ॥ कापिच० ॥ ५ ॥ विपुलपुलक पृथुवेपथुभंगा ॥ श्वसि-तनिमीलितविकसदनंगा ॥ कापिच० ॥६॥ श्रमज-लकणभरसुभगशरीरा ॥ परिपतितोरसि रतिरणधी-रा ॥ कापिच० ॥ ७ ॥ श्रीजयदेवभणितंहरिरमितम् ॥ कलिकलुषंजनयतु परिरमितम् ॥ कापिच० ॥८॥

॥ श्लोकः ॥ विरहपांडुमुरारि मुखांबुजद्युति-रयं तिरयन्नपि वेदनाम् ॥ विधुरतीव तनोतिमनो भुवः सुहृदये हृदये मदनव्यथाम् ॥ ५ ॥

गुर्जरीरागे एकतालीताले अष्टपदी ३.

समुदितमदने रमणीवदने चुंबनवलिताधरे ॥ मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे ॥ रमते यमुनापुलिनवने विजयी मुरारिरधुना ॥ ध्रु० ॥ १ ॥ घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने ॥ कुरुबककुसुमं चपलासुषमं रतिपतिमृगकानने रमते य० ॥ २ ॥ घटयति सुघने कुचयुगगगने मृगमदरुचिरूषिते ॥ मणिसरमगलं तारकपटलं नगपदशशिभूषिते ॥ रमते य० ॥ ३ ॥ जितबिसशकले मृदुभुजयुगले करतलनलिनीदले ॥ मरकतवलयं मधुकरनिचयं वितरति हिमशीतले ॥ रमते य० ॥ ४ ॥ रति गृह जघने विपुलापघने मनसिजकनकासने ॥ मणिमयरशनं तोरणहसनं विकिरति कृतवासने ॥ रमते य० ॥५॥ चरणकिसलये कमलानिलये नखमणिगणपूजिते ॥ बहिरपवरणं यावकभरणं जनयति हृदि योजिते ॥

रमतेय० ॥ ६ ॥ रमयतिसुदृशं कामपि सदृशं खल हलधरसोदरे ॥ किमफलमवसं वद सखि विरसं चिरमिह विटपोदरे ॥ रमते य० ॥ ७ ॥ इह रसभणने कृतहरिगुणने मधुरिपुपदसेवके ॥ कलियुगरचितं न वसतु दुरितं कविनृपजयदेवके रमते य०

॥ श्लोकः ॥ नायातः सखि निर्दयो यदिशठस्त्वं दूति किं दूयसे स्वच्छंदं बहुवल्लभः सरमते क्रिंतत्र ते दूषणम् ॥ पश्याद्य प्रियसंगमाय दयितस्याकृष्यमाणं गुणैरुत्कंठार्तिभरादिव स्फुटदिदंचेतः स्वयं यास्यति ॥ ६ ॥

देशांकरागे रूपकताले अष्टपदी ४.

अनिलतरलकुवलयनयनेन ॥ तपति न सा किसलयशयनेन ॥ सखि या रमिता वनमालिनिना ॥ ध्रु० ॥ १ ॥ विकासितसरसिजललितमुखेन ॥ स्फुटति न सा मनसिजविशिखेन ॥ सखि या० ॥ २ ॥ अमृतमधुरमृदुतरवचनेन ॥ ज्वलति न

सा मलयजपवनेन ॥ सखि या० ॥ ३ ॥ स्थलजलरुहरुचिकरचरणेन ॥ दहति न सा हिमकरकिरणेन ॥ सखि या० ॥ ४ ॥ सजलजलदसमुदयरुचिरेण ॥ दलति न सा हृदि विरहभरेण ॥ सखि या० ॥ ५ ॥ कनकनिकषरुचिशुचिवसनेन ॥ श्वसति न सा परिजनहसनेन ॥ सखि या० ॥ ६ ॥ सकलभुवनजनवरतरुणेन ॥ वहति न सा रुजमतिकरुणेन ॥ सखि या० ॥ ७ ॥ श्रीजयदेव भणितरमणेन ॥ प्रविशतुहरिरपि हृदयमनेन ॥ ॥ सखि या० ॥ ८ ॥

श्लोकाः ॥ मनोभवानंदन चंदनानिल प्रसीद रे दक्षिण मुंच वामताम् ॥ क्षणं जगत्प्राण विधाय माधवं पुरो मम प्राणहरो भविष्यसि ॥ ७ ॥ रिपुरिव सखीसंवासोयं शिखीव हिमानिलो विषमिव सुधारश्मिर्दूरं दुनोतिमनोगते ॥ हृदयमदये तास्मिन्नेवं पुनर्वलते बलात् कुवलयदृशां वामः कामो

निकामनिरंकुशः ॥ ८ ॥ बाधां विधेहि मलया-
निल पंचबाण प्राणान् गृहाण न गृहं पुनराश्रयि-
ष्ये ॥ किंतेकृतांतभगिनि क्षमया तरंगैरंगानिसिंच
मम शाम्यतु देहदाहः ॥ ९ ॥ सांद्रानंद पुरंदरा-
दिदिविषद्वृंदैरमंदादरादानम्रैर्मुकुटेंद्रनीलमणिभिः
संदर्शितेंदीवरम् ॥ स्वच्छंदं मकरंदसुंदरगलन्मंदा-
किनीमेदुरं श्रीगोविंदपदारविंदमशुभस्कंदायवंदा-
महे ॥ १० ॥ इतिश्रीगीतगोविंदे नागरनारायणो
नाम सप्तमः सर्गः ॥ ७ ॥

॥ अथाष्टमः सर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ अथ कथमपि यामिनीं निनीय
स्मरशरजर्जरितापि सा प्रभाते ॥ अनुनयवचनं
वदंतमग्रेप्रणतमपिप्रियमाह साभ्यसूयम् ॥ १ ॥

भैरवीरागे रूपकताले अष्टपदी १.

रजनिजनितगुरुजागररागकषायितमलसनिमेषम्
॥ वहति नयनमनुरागमिव स्फुटमुदितरसाभिनि-

वेशम् ॥ हरि हरि याहि माधव याहि केशव मा वद कैतववादम् ॥ तामनुसर सरसीरुहलोचन या तव हरति बिषादम् ॥ ध्रु० ॥ १ ॥ कज्जल मलिन विलोचनचुंबनविरचितनीलिमरूपम् ॥ दशनवसनमरुणं तव कृष्ण तनोति तनोरनुरूपम् ॥ हरिह० ॥ २ ॥ वपुरनुवहति तव स्मरसंगरखरनखरक्षतरेखम् मरकतशकलकलितकलधौतलिपेरिवरतिजयलेखम् ॥ हरिह० ॥ ३ ॥ चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम् ॥ दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम् ॥ हरिह० ॥ ४ ॥ दशनपदं भवदधरगतं मम जनयति चेतसि खेदम् ॥ कथयति कथमधुनापि मया सह तव वपुरेतदभेदम् ॥ हरिह० ॥ ५ ॥ बहिरिव मलिनतरं तव कृष्ण मनोपि भविष्यति नूनम् ॥ कथमथ वंचयसे जनमनुगतमसमशरज्वरदूनम् ॥ हरिह० ॥ ६ ॥ भ्रमति भवानबलाकवलाय वनेषु किमत्र वि-

चित्रम् ॥ प्रथयतिपूतनिकैव वधूवधनिर्दयबालचरित्रम् ॥ हरिह० ॥ ७ ॥ श्रीजयदेवभणितरतिवंचितखंडितयुवतिविलापम् ॥ शृणुतसुधामधुरं विबुधा विबुधालयतोपि दुरापम् ॥ हरिह० ॥ ८ ॥

॥ श्लोकाः ॥ तवेदंपश्यंत्याः प्रसरदनुरागं बहिरिव प्रियापादालक्तच्छुरितमरुणद्योतिरुदयम् ॥ ममाद्य प्रख्यातप्रणयभरभंगेन कितवत्वदालोकः शोकादपिकिमपिलज्जां जनयति ॥ २ ॥ प्रातर्नीलनिचोलमच्युतमुरःसंवीतपीतांशुकं राधायाश्चकितं विलोक्य हसति स्वैरं सखी मंडले ॥ व्रीडाचंचलमंचलंनयनयोराधापराधानने स्वादुस्मेरमुखोयमस्तुजगदानंदाय नंदात्मजः ॥ २ ॥ इतिगीतगोविंदे विलक्षलक्ष्मीपतिर्नामाष्टमः सर्गः ॥

॥ अथ नवमः सर्गः प्रारभ्यते ॥

॥ आर्या ॥ अथ तां मन्मथखिन्नां रतिरस-

भिन्नां विषादसंपन्नाम् ॥ अनुचिंतितहरिचरिता कलहांतरितामुवाचरहःसखी ॥ १ ॥

गुर्जरीरागे रुपकताले अष्टपदी १.

हरिरभिसरति वहतिमधुपवने ॥ किमपरमधिकसुखं सखि भवने ॥ माधवे मा कुरु मानिनिमानमये ॥ ध्रु० ॥ १ ॥ तालफलादपि गुरुमतिसरसम् ॥ किं विफलीकुरुषे कुचकलशम् ॥ माध० ॥ २ ॥ कति न कथितमिदमनुपदमचिरम् ॥ मापरिहर हरिमतिशयरुचिरम् ॥ माध० ॥ ३ ॥ किमिति विषीदसि रोदिषि विकला ॥ विहसति युवतिसभा तव सकला ॥ माध० ॥ ४ ॥ सजलनलिनीदलशीलितशयने ॥ हरिमवलोकय सफलय नयने ॥ माध० ॥ ५ ॥ जनयसि मनसि किमितिगुरुखेदम् ॥ शृणु मम वचनमनीहितभेदम् ॥ माध० ॥ ६ ॥ हरिरुपयातु वदतु बहु मधुरम् ॥ किमिति करोषि हृदयमतिविधुरम् ॥ माध० ॥ ७ ॥ श्रीजयदेव भ-

णितमतिललितम् ॥ सुखयतु रसिकजनं हरिचरितम् ॥ माधव० ॥ ८ ॥

॥ श्लोकौः ॥ स्निग्धे यत् परुषासि यत् प्रणमति स्तब्धासि यद्रागिणि द्वेषस्थासि यदुन्मुखे विमुखता यातासि तस्मिन् प्रिये ॥ तद्युक्तं विपरीतकारिणि तव श्रीखंडचर्चाविषं शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः ॥ २ ॥ अंतर्मोहनमौलिघूर्णनवलन्मंदारविस्रंसनःस्तब्धाकर्षणदृष्टिहर्षणमहामंत्रः कुरंगीदृशाम् ॥ दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां भ्रंशः कंसरिपोर्व्यपोहयतुवःश्रेयांसि वंशीरवः ॥ ३ ॥ इतिश्रीगीतगोविंदे मुग्धमुकुंदोनाम नवमः सर्गः ॥ ९ ॥

॥ अथ दशमः सर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ अत्रांतरे मसृणरोषवशामसीमनिःश्वासनिःसहमुखीं सुमुखीमुपेत्य ॥ सव्रीडमीक्षितसखीवदनां दिनांते सानंदगद्गदपदं हरिरित्युवाच १

देशवराडिरागे आडवताले अष्टपदी १.

वदसि यदि किंचिदपि दंतरुचिकौमुदी हरति दर-तिमिरमतिघोरम् ॥ स्फुरदधरसीधवे तव वदनचंद्रमा रोचयति लोचनचकोरम् ॥ प्रियेचारुशीले प्रियेचा-रुशीले मुंच मयि मानमनिदानम् ॥ सपदि मदना-नलो दहति मम मानसं देहिमुखकमलमधुपानम् ॥ध्रु० ॥१॥ सत्यमेवासि यदि सुदति मयि कोपिनी देहिखरनखरशरघातम् ॥ घटय भुजबंधनं जनय रदखंडनं येनवा भवति सुखजातम् ॥ प्रिये चारु-शीले० ॥२॥ त्वमसि मम जीवनं त्वमसि मम भव-जलधिरत्नम् ॥ भवतु भवतीह मयि सततमनुरो-धिनी तत्र मम हृदयमति यत्नम् ॥ प्रिये चारु-शीले० ॥ ३ ॥ नीलनलिनाभमपि तन्वि तव लोच-नंधारयति कोकनदरूपम् ॥ कुसुमशर बाणभावेन यदि रंजयसिकृष्ण मिदमेतदनुरूपम्॥प्रिये चारु-शीले० ॥ ४ ॥ स्फुरतु कुचकुंभयोरुपरिमणिमंजरी

रंजयतुतवहृदयदेशम् ॥ रसतु रशनापि तव घनजघनमंडले घोषयतु मन्मथनिदेशम् ॥ प्रिये चारुशीले० ॥ ५ ॥ स्थलकमलगंजनं मम हृदयरंजनं जनितरतिरंगपरभागम् ॥ भणमसृणवाणि करवाणि चरणद्वयं सरसलसदलक्तकसुरागम् ॥ प्रिये चारुशीले० ॥ ६ ॥ स्मरगरलखंडनं मम शिरसिमंडनं देहि पदपल्लवमुदारम् ॥ ज्वलति मयि दारुणो मदनकदनानलो हरतु तदुपहित विकारम्॥ प्रिये चारुशीले० ॥ ७ ॥ इति चटुलचाटुपटु चारु मुरवैरिणोराधिकामधिवचनजातम् ॥ जयति जयदेवकविभारतीभूषितं मानिनीजनजनितशातं ॥ प्रिये चा० ॥ ८ ॥

॥ श्लोकाः ॥ परिहर कृतातंके शंकां त्वयासततं घनस्तनजघनयाक्रांते स्वांते परानवकाशिनि ॥ विशति वितनोरन्यो धन्यो नकोपि ममांतरं स्तनभरपरीरंभारंभे विधेहि विधेयताम् ॥ २ ॥ मुग्धे

विधेहि मयि निर्दयदंतदंशं दोर्वल्लिबंधनिबिडस्तन-
पीडनानि ॥ चंडित्वमेव मुदमंचय पंचबाणचंडाल-
कांडदलनादसवः प्रयांति ॥ ३ ॥ शशिमुखि तव
भाति भंगुरभ्रूर्युवजनमोहकरालकालसर्पी ॥ तदु-
दितभयभंजनाय यूनां त्वदधरसीधुसुधैव सिद्ध-
मंत्रः ॥ ४ ॥ व्यथयति वृथा मौनं तन्वि प्रपंचय
पंचमं तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः ॥
सुमुखि विमुखीभावं तावद्विमुंच नवंचय स्वयम-
तिशयस्निग्धो मुग्धे प्रियोहमुपस्थितः ॥ ५ ॥
बंधूकद्युतिबांधवोयमधरः स्निग्धो मधूकच्छविर्गंड-
श्चंडि चकास्ति नीलनलिन श्रीमोचनं लोचनम् ॥
नासाभ्येति तिलप्रसूनपदवीं कुंदाभदंतिप्रिये
प्रायस्त्वन्मुखसेवया विजयते विश्वं सपुष्पायुधः
॥ ६ ॥ दृशौ तव मदालसे वदनमिंदुमत्यान्वितं
मतिर्जनमनोरमा विधुतरंभमूरुद्वयम् ॥ रतिस्तव
कलावती रुचिरचित्रलेखे भ्रुवावहो विबुधयौवनं

वहसितन्विपृथ्वीगता ॥ ७ ॥ प्रीतिंवस्तनुतां हरिः कुवलयापीडेन सार्धं रणे राधापीनपयोधरस्मरणकृत्कुंभेन संभेदवान् ॥ पत्रे बिभ्यति मीलति क्षणमभ्रात्क्षिप्रं तदालोकनात्कंसस्याथ जितं जितं जितमिति व्यालोलकोलाहलः ॥ ८ ॥ इति श्रीगीतगोविंदे मानिनीवर्णने चतुरचतुर्भुजोनाम दशमः सर्गः समाप्तः ॥ १० ॥

॥ अथैकादशः सर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं गतवति कृतवेषे केशवे कुंजशय्याम् ॥ रचितरुचिरभूषां दृष्टिमोषे प्रदोषे स्फुरति निरवसादां कापि राधां जगाद ॥ १ ॥

वसंतरागे रूपकताले अष्टपदी १.

विरचितचाटुवचनरचनं चरणरचितप्रणिपातम्
संप्रति मंजुलवंजुलसीमनि केलिशयनमनुयातम् ॥

मुग्धे मधुमथनमनुगतमनुसरराधिके ॥ ध्रु० ॥ १ ॥
घनजघनस्तनभारभरे दरमंथरचरणविहारम् ॥ मुखरितमणिमंजीरमुपैहि विधेहि मरालविकारम् ॥ मुग्धे मधु० ॥ २ ॥ शृणु रमणीरमणीयतरंतरुणीजनमोहनमधुरिपुरावम् ॥ कुसुमशरासनशासनवंदिनि पिकनिकरेभज भावम् ॥ मुग्धे मधु० ॥ ३ ॥ अनिलतरलकिसलयतिकरेण करेणलतानिकुरंभम् ॥ प्रेरणमिव करभोरु करोति गतिं प्रति मुंच विलंबम् ॥ मुग्धे मधु० ॥ ४ ॥ स्फुरितमनंगतरंगवशादिव सूचितहरिपरिरंभम् ॥ पृच्छमनोहरहारविमलजलधारममुं कुचकुंभम् ॥ मुग्धे मधु० ॥ ५ ॥ अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम् ॥ चंडि रसितरशनारवडिंडिममभिसर सरसमलज्जम् ॥ मुग्धे मधु० ॥ ६ ॥ स्मरशरसुभगनखेन सखिमवलंब्य करेण सलिलम् ॥ चलवलयक्वणितैरवबोधय हरिमपि निजगतिशीलम् ॥ मुग्धे मधु० ॥ ७ ॥ श्रीजयदेव भणितमधरी-

कृतहारमुदासितवामम् ॥ हरिविनिहितमनसामधि-
तिष्ठतु कंठतटीमभिरामम् ॥ मुग्धे मधु० ॥ ८ ॥

॥ श्लोकाः ॥ सा मां द्रक्ष्यति वक्ष्यति प्रियकथां प्रत्यंगमालिंगनैः प्रीतिं यास्यति रंस्यते सखि समागत्येति चिंताकुलः ॥ स त्वां पश्यति कंपते पुलकयत्यानंदति स्विद्यति प्रत्युद्गच्छति मूर्च्छति स्थिरतमः पुंजे निकुंजे प्रियः ॥ २ ॥ अक्ष्णोर्निक्षिपदंजनं श्रवणयोस्तापिच्छगुच्छावलिं मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम् ॥ धूर्तानामभिसारसत्वरहृदां विष्वङ्निकुंजे सखी ध्वांतं नीलनिचोलचारु सुदृशां प्रत्यंगमालिंगति ॥ ३ ॥ काश्मीरगौरवपुषामभिसारिकाणामाबद्धरेखमभितो मणिमंजरीभिः ॥ एतत्तमालदलनीलतमं तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोति ॥ ४ ॥ हारावलीतरलकांचनकांचिदाम केयूरकंकणमणिद्युतिदीपितस्य ॥

द्वारे निकुंजनिलयस्य हरिं निरीक्ष्य व्रीडावतीमथ-सखीनिजगाद राधाम् ॥ ५ ॥

वराडिरागे आडवताले अष्टपदी २.

मंजुतरकुंजतलकेलिसदने ॥ १ ॥ प्रविश राधे माधवसमीपमिह विलस, रतिरभसहसितवदने ॥ नवमवशोकदलशयनसारे ॥ प्रविशराधेमाधवसमीपमिह विलस, कुचकलशतरलहारे ॥ २ ॥ कुसुमचयरचितशुचिवासगेहे ॥ प्रविश राधे माधवसमीपमिह विलस, कुसुमसुकुमारदेहे ॥ ३ ॥ चलमलयपवनसुरभि शीते ॥ प्रविश राधे माधवसमीपमिह विलस, रसवलित ललितगीते ॥ ४ ॥ विततबहुवल्लिनवपल्लवघने ॥ प्रविश राधे माधवसमीपमिहविलस चिरमिलितपीनजघने ॥ ५ ॥ मधुमिलितमधुपकुलकलितरावे ॥ प्रविश राधे माधवसमीपमिह विलस, मदनरभसरसभावे ॥ ६ ॥ मधुतरलपिकनिकरनिनदमुखरे ॥ प्रविश राधे माध-

वसमीपमिह विलस, दशनरुचिरुचिरशिखरे ॥ ॥ ७ ॥ विहितपद्मावतीसुखसमाजे ॥ कुरु मुरारे मंगलशतानीह भणति जयदेवकविराजराजे ॥ ८ ॥

॥ श्लोकौ ॥ त्वां चित्ते न चिरं वहन्नयमतिश्रांतो भृशं तापितः कंदर्पेण च पातुमिच्छति सुधासंबाधबिंबाधरम् ॥ अस्यांकं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलवक्रीते दासइवोपसेवितपदांभोजे कुतः संभ्रमः ॥ ६ ॥ सा ससाध्वससानंदं गोविंदे लोललोचना ॥ सिंजाना मंजुमंजीरं प्रविवेश निवेशनम् ॥ ७ ॥

विराडिरागे रूपकताले अष्टपदी २.

राधावदनविलोकनविकासितविविधविकारविभंगम् ॥ जलनिधिमिव विधुमंडलदर्शनतरलिततुंगतरंगम् ॥ हरिमेकरसं चिरमभिलषितविलासम् ॥ सा ददर्श गुरुहर्षवशंवद वदनमनंगनिवासम् ध्रु०

॥ १ ॥ हारममलतरतारमुरसि दधतं परिलंभितदूरम्
॥ स्फुटतरफेनकदंबकरंबितमिव यमुनाजलपूरम् ॥
हरिमेकरसं० ॥ २ ॥ श्यामलमृदुलकलेवरमंडनमधिग
तगौरदुकूलम् ॥ नीलनलिनमिव पीतपरागपटलभ
रवलयितमूलम् ॥ हरिमेकरसं० ॥ ३ ॥ तरलदृगंच-
लचलनमनोहरवदनजनितरतिरागम् ॥ स्फुटकम-
लोदरखेलितखंजनयुगमिव शरदि तडागम् ॥ हरि
मेकरसं० ॥ ४ ॥ वदनकमलपरिशीलनमीलित
मिहिरसमकुंडलशोभम् ॥ स्मितरुचिरुचिरसमुल्ल-
सिताधरपल्लवकृतरतिलोभम् ॥ हरिमेकरसं० ॥ ५ ॥
शशिकिरणच्छुरितोदरजलधरसुंदरकुसुमसुकेशम् ॥
तिमिरोदितवधुमंडलनिर्मलमलयजतिलकनिवेशम्
॥ हरिमेकरसं० ॥ ६ ॥ विपुलपुलकभरदंतुरितं रति-
केलिकलाभिरधीरम् ॥ मणिगणकिरणसमूहसमु-
ज्ज्वलभूषणसुभगशरीरम् ॥ हरिमेकरसं० ॥ ७ ॥
श्रीजयदेवभणितविभवाद्विगुणीकृतभूषणभारम् ॥

प्रणमत हृदि विनिधाय हरिं भवजलधिसुकृतोदयसारम् ॥ हरिमे० ॥ ८ ॥

॥ श्लोकः ॥ अतिक्रम्यापांगं श्रवणपथपर्यंतगमनप्रयासेनैवाक्ष्णोस्तरलतरतारं पतितयोः ॥ इदानीं राधायाः प्रियतमसमालोकसमये पपातस्वेदांबुप्रसरइव हर्षाश्रुनिकरः ॥ १ ॥ भजंत्यास्तल्पांतं कृतकपटकंडूतिपिहितस्मिते याते गेहाद्बहिरवहितालीपरिजने ॥ प्रियास्यं पश्यंत्याः स्मरशरवशाकूतसुभगं सलज्जालज्जापि व्यगमदिव दूरं मृगदृशः ॥ २ ॥ जयश्रीविन्यस्तैर्महितइव मंदारकुसुमैः स्वयं सिंदूरेण द्विपरणमुदा मुद्रित इव ॥ भुजापीडक्रीडाहतकुवलयापीडकरिणः प्रकीर्णासृग्बिंदुर्जयति भुजदंडोमुरजितः ॥ ३ ॥ इति श्रीगीतगोविंदे सानंदगोविंदो नामैकादशः सर्गः समाप्तः ॥ ११ ॥

॥ अथ द्वादशसर्गः प्रारभ्यते ॥

॥ श्लोकः ॥ गतवति सखीवृंदे मंदत्रपाभरनि-

भरस्मरशरवशाकूतस्फीतस्मितस्नपिताधराम् ॥ सरसमनसंदृष्ट्वाराधां मुहुर्नवपल्लवप्रसवशयने विक्षिप्ताक्षीमुवाच हरिः प्रियां ॥ १ ॥

विभासरागे एकतालीताले अष्टपदी १.

किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम् ॥ तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम् ॥ क्षणमधुना नारायणमनुगतमनुसर भो राधिके ॥ ध्रु० ॥ १ ॥ करकमलेन करोमि चरणमहमागमितासि विदूरम् ॥ क्षणमुपकुरुशयनोपरि मामिव नूपुरमनुगतिशूरम् ॥ क्षणम० ॥ २ ॥ वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम् ॥ विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम् ॥ क्षणम० ॥ ३ ॥ प्रियपरिरंभणरभसवलितमिव पुलकितमन्यदुरापम् ॥ मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम् ॥ क्षणम० ॥ ४ ॥ अधरसुधारसमुपनयभामिनि जीवय मृतमिव दा-

सम् ॥ त्वयि विनिहितमनसं विरहानलदग्धवपु-
षमविलासम् ॥ क्षणम० ॥ ५ ॥ शशिमुखि मुखरय
मणिरशनागुणमनुगुणकंठनिदानम् ॥ मम श्रुति-
युगलेपिकरवविकलेशमय चिरादवसादम् ॥ क्षण-
म० ॥ ६ ॥ मामतिविफलरुषा विकलीकृतम-
वलोकितुमधुनेदम् ॥ मीलति लज्जितमिव नयनं
तव विरम विसृज रतिखेदम् ॥ क्षणस० ॥ ७ ॥
श्रीजयदेव भणितमिदमनुपदनिगदितमधुरिपुमो-
दम् ॥ जनयतु रसिकजनेषु मनोरमरतिरसभाव-
विनोदम् ॥ क्षणमधुना० ॥ ८ ॥

॥ श्लोकः ॥ प्रत्यूहःपुलकांकुरेण निबिडाश्लेषे
निमेषेणच क्रीडाकूतविलोकितेऽधरसुधापाने कथा-
केलिभिः ॥ आनंदाधिगमेन मन्मथकलायुद्धेपि
यस्मिन्नभूदुद्भूतः स तयोर्बभूव सुरतारंभः प्रियं-
भावुकः ॥ २ ॥ दोर्भ्यां संयमितः पयोधरभरेणा-
पीडितः पाणिजैराविद्धो दशनैः क्षताधरपुटः श्रो-

णीतटेनाहतः ॥ हस्तेनानमितः कचेऽधरमधुस्यंदेन संमोहितः कांतः कामपि तृप्तिमाप तदहो कामस्य वामागतिः ॥ ३ ॥ मारांकेरतिकेलिसंकुलरणारंभेतया साहसप्रायं कांतजयाय किंचिदुपरि प्रारंभियत्संभ्रमात् ॥ निष्पंदा जघनस्थली शिथिलिता दोर्वल्लिरुत्कंपितं वक्षो मीलितमक्षिपौरुषरसः स्त्रीणां कुतः सिद्ध्यति ॥ ३ ॥ तयाः पाटलपाणिजांकितमुरो निद्राकषायेदृशौ निर्धूताऽधरशोणिमा विलुलितस्रस्तस्रजो मूर्द्धजाः ॥ कांचीदामदरश्लथांचलमिति प्रातर्निखातैर्दृशोरेभिः कामशैरस्तदद्भुतमहो पत्युर्मनः कीलितम् ॥ ४ ॥ त्वामप्राप्यमपि स्वयंवरपरां क्षीरोदतीरोदरेशंके सुंदरि कालकूटपमपिबन्मूढो मृडानीपतिः ॥ इत्थं पूर्वकथाभिरन्यमनसो विक्षिप्यवामांचलं राधायाः स्तनकोरकोपरि चलन्नेत्रो हरिः पातुवः ॥ ५ ॥ व्यालोलः केशपाशस्तरलितमलकैःस्वेदलोलौक-

154954
ASIATIC SOC

पोलौ स्पष्टा दष्टाधरश्रीः कुचकलशरुचाहारिता हारयष्टिः ॥ कांची कांचिद्गताशां स्तनजघनपदं पाणिनाच्छाद्य सद्यः पश्यंती सत्रपं मां तदपि विलुलितस्रग्धरेयं धुनोति ॥ ७ ॥ ईषन्मीलित-दृष्टि मुग्धहसितं सीत्कारधारावशादव्यक्ताकुलके-लिकाकुविकसद्दंतांशुधौताधरम् ॥ श्वासोन्नद्धपयो-धरोपरि परिष्वंगात्कुरंगीदृशोहर्षोत्कर्षविमुक्तनिः-सहतनोर्धन्यो धयत्याननम् ॥ ८ ॥ अथ सहसा-सुप्रीतं सुरतस्यांते नितांतखिन्नांगी ॥ राधा जगाद सादर मिदमानंदेन गोदिंदम् ॥ ९ ॥

रामकरिरागे रूपकताले अष्टपदी २.

कुरु यदुनंदन चंदनशिशिरतरेण करेण पयो-धरे ॥ मृगमदपत्रकमत्रमनोभवमंगलकलशसहोदरे ॥ निजगाद सा यदुनंदने क्रीडतिहृदयानंदने ॥ ध्रु० ॥ १ ॥ अलिकुलगंजनसंजनकं रतिनायक-

सायक मोचने ॥ त्वदधरचुंबनलंबितकज्जलमु-
ज्ज्वलय प्रिय लोचने ॥ नि० ॥ २ ॥ नयनकुरंग-
तरंगविलासनिरोध करेश्रुतिमंडले ॥ मनसिजपा-
शविलासधरे शुभवेष निवेशयकुंडले ॥ नि० ॥ ३ ॥
भ्रमरचयं रचयंतमुपरिरुचिरं सुचिरं मम संमुखे ॥
जितकमले विमले परिकर्मयनर्मजनकमलकं मुखे
॥ नि० ॥ ४ ॥ मृगमदरसवलितं ललितं कुरु
तिलकमलिकरजनीकरे ॥ विहितकलंककलं
कमलाननविश्रमितश्रमसीकरे ॥ ५ ॥ मम रुचिरे
चिकुरे कुरुमानद मनसिजध्वजचामरे ॥ रतिग-
लिते ललिते कुसुमानि शिखंडिशिखंडकडामरे ॥
नि० ॥ ६ ॥ सरसघने जघने मम शंबरदारणवा-
रणकंदरे ॥ मणिरशनावसनाभरणानि शुभाशय-
वासयसुंदरे ॥ नि० ॥ ७ ॥ श्रीजयदेववचसिशु-
भदे हृदयं सदयं कुरु मंडने ॥ हरिचरणाब्ज-
स्मरणामृतकृतकलिकलुषज्वरखंडने ॥ नि० ॥ ८ ॥

॥ श्लोकाः ॥ रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयोर्घटय जघने कांचीमंच स्रजाकबरी भरम् ॥ कलय घलय श्रेणीं पाणौ पदे कुरु नूपुराविति निगदितः पीतः पीतांबरोपि तथाकरोत् ॥ १० ॥ पर्यंकीकृतनागनायकफणाश्रेणीमणीनांगणे संक्रांतप्रतिबिंबसंकलनया बिभ्रद्वपुर्विक्रियाम् ॥ पादांभोरुदधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः कायव्यूहमिवाचयन्नुपचितताकूतो हरिःपातुवः ॥ ११ ॥ यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवंयच्छृंगारविवेकतत्त्वरचनाकाव्येषु लीलायितम् ॥ तत्सर्वं जयदेवपंडितकवेःकृष्णैकतानात्मनः सानंदाःपरिशोधयंतु सुधियःश्रिगीतगोविंदतः ॥ १२ ॥ साध्वी माध्वीकचिंता नभवातिभवतःशर्करे कर्कशासि द्राक्षे द्रक्ष्यंति केत्वाममृतमृतमसिक्षिरनीरं रसस्ते ॥ माकंदकंद कांताधरधरणितलं गच्छ यच्छन्ति यावद्भावंशृंगारसारस्वतमिह जयदेवस्य विष्वग्वचांसि

॥ १३ ॥ श्रीभोजदेवप्रभवस्य वामदेवीसुतश्रीजयदेवकस्य ॥ पराशरादिप्रियवर्गकंठे श्रीगीतिगोविंदकवित्वमस्तु ॥ १४ ॥ इति श्रीगीतगोविंदे महा कवि जयदेवपंडितकृतौ पीतपीतांबरोनमद्वादशः सर्गः समाप्तः ॥ १२ ॥

समाप्तम्.

जाहिरखबर.

---*---

हमारे ज्ञानसागर छापखानेमें अनेक तरहके ग्रंथ वैदिक, वेदांत, पुराण धर्मशास्त्र, कर्मकांड, व्याकरण, न्याय, छंदोपनिषद्, काव्य, अलंकार, नाटक, चंपू, कोश, वैद्यक, अरु प्रकीर्णग्रंथ, स्तोत्रादि, किस्सा, वगैरे अनेक तरहके ग्रंथ भाषा अरु संस्कृतके छपेहुए तैयार हैं जो किसी महाशयोंकों चाहिये सो दाम भेजकर मंगालेवैं प्रथम कीमतका निश्चै करना होय तो पुस्तकोंका सूचीपत्र आधा आनेका टीकट भेजकर मंगा लेवैं ।

पुस्तक मिलनेका ठिकाणा.

पंडित श्रीधर शिवलालजी ज्ञानसागर छापखाना.

(मुंबई.)

और.

"ज्ञानसागर" पुस्तकालय नवाबाजार अजमेर.

सूचना

हमारे ज्ञानसागर छापखानेमें अनेक तरहके ग्रंथ—वैदिक, वेदांत, पुराण, धर्मशास्त्र, कर्मकांड, व्याकरण, न्याय, छंदोपनिषद, काव्य, अलंकार, नाटक, चंपू, कोश, वैद्यक, अरु प्रकीर्णग्रंथ, स्तोत्रादि, किस्सा, वगैरे अनेक तरहके भाषा अरु संस्कृतमें छापकर तैयार हैं. जो किसी महाशयोंको चाहिये सो दाम भेजकर मंगालेवें. पूर्वमें दामोंका निश्चैकरना होय तो सब पुस्तकोंका सूचीपत्र आध आनेका टीकट भेजकर मंगालेवें.

पुस्तक मिलनेका ठिकानाः—

पंडित श्रीधर शिवलाल,

ज्ञानसागर छापखाना (मुंबई.)

अजमेरमेंः—

पंडित श्रीधर शिवलालजीके

ज्ञानसागर पुस्तकालय नया बजार अजमेर.

00154954

Digitized with financial assistance from the
Mr. Sangi
on 12 April, 2019